# ॥ श्री हयग्रीव स्तोत्रम् ॥

ओं ॥ हयग्रीव दयासिंधो बंधो सज्जनसंततेः ।
त्रयिग्रीव नमश्चांद्रसांद्रकांतिसमांशुमन् ॥ १ ॥

स्वामिन्सघृण काप्यंबा किं बालकममुंचत ।
पालय श्रीपते तस्मादस्यान्सेवकसेवकान् ॥ २ ॥

ईश तेऽनीश जीव त्वं तत्त्वं वक्ति न युक्तिमान् ।
अश्वो भूत्वाऽपि यो मर्त्योऽमर्त्यो वाऽश्वो जगत्त्रये ॥ ३ ॥

हयास्य पश्य भृत्यं ते हंतेमे भूतराक्षसाः ।
जिघांसंत्यात्त चक्रस्त्वं सत्वं विस्तार्य रक्ष माम् ॥ ४ ॥

यमोऽपि ते भटस्त्वं च पंचरूपो भवान्प्रभुः ।
आज्ञापयतु राजाऽसौ दासाग्र्यं मयि मोचयेत् ॥ ५ ॥

अनंतगुणसंपूर्ण धूर्न काऽप्यत्र मे प्रिया ।
तव पादाब्जसेवैव जैवबंधविमोचिनी ॥ ६ ॥

सुरम्य सुखचिद्रूप धूपदीपार्चनादिकम् ।
तव प्रियं सदा कुर्यां पुर्यां वा पर्वतेऽपि वा ॥ ७ ॥

विद्यां देहि विवेकं च शं च सर्वत्र देहि मे ।
श्रद्धां देहि तथा पाहि मा हिनस्ति यथा परः ॥ ८ ॥

ससुरासुरगंधर्वपूर्वसर्वजगत्पते ।
शरणं भव वाणीशवीशभोगीशसेवित ॥ ९ ॥

हयानन हर क्लेशं लेशं दर्शय नः प्रभो ।
भवन्मुखांबुजे नृत्यच्छ्रुत्यंताख्यवधूहृदाम् ॥ १० ॥

वादिराजाख्ययतिना सादरं रचितां स्तुतिम् ।
श्रीधरांघ्रियुगे भक्तिं साधयन् सर्वदा पठेत् ॥ ११ ॥

॥ इति श्रीमद्वादिराज पूज्यचरण विरचितं हयग्रीव स्तोत्रं समाप्तम् ॥